# Gopaih Kritam Shri Kritam Shrikrishna Stotram

# ગોપૈઃ કૃતં શ્રીકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Gopaih Kritam Shri Kritam Shrikrishna Stotram

File name : gopaiHkRRitaMshrIkRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, harivaMsha

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : harivaMsha | adhyAya 63.1-9||

Latest update : September 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 30, 2024

*sanskritdocuments.org*

Gopaih Kritam Shri Kritam Shrikrishna Stotram

# ગોપૈઃ કૃતં શ્રીકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

ગતે શક્રે તતઃ કૃષ્ણઃ પૂજ્યમાનો વ્રજૌકસૈઃ ।
ગોવર્ધનધરઃ શ્રીમાન્ વિવેશ વ્રજમેવ હ ॥ ૧॥

તં સ્મ વૃદ્ધાભિનન્દન્તિ જ્ઞાતયશ્ચ સહોષિતાઃ ।
ધન્યાઃ સ્મોઽનુગૃહીતાઃ સ્મસ્ત્વદ્ધૃતેન નગેન હ ॥ ૨॥

ગાવો વર્ષભયાત્તીર્ણા વયં તીર્ણા મહાભયાત્ ।
તવ પ્રસાદાદ્ગોવિન્દ દેવતુલ્ય મહાદ્યુતે ॥ ૩॥

અમાનુષાણિ કર્માણિ તવ પશ્યામ ગોપતે ।
ધારણેનાસ્ય શૈલસ્ય વિદ્મસ્ત્વાં કૃષ્ણમવ્યયમ્ ॥ ૪॥

કસ્ત્વં ભવસિ રુદ્રાણાં મરુતાં વા મહાબલ ।
વસૂનાં વા કિમર્થં ચ વસુદેવઃ પિતા તવ ॥ ૫॥

વને ચ બાલક્રીડા તે જન્મ ચાસ્માસુ ગર્હિતમ્ ।
કૃષ્ણ દિવ્યા ચ તે ચેષ્ટા શઙ્કિતાનિ મનાંસિ નઃ ॥ ૬॥

કિમર્થં ગોપવેષેણ રમસેઽસ્માસુ ગર્હિતમ્ ।
લોકપાલોપમશ્ચૈવ ગાસ્ત્વં કિં પરિરક્ષસિ ॥ ૭॥

દેવો વા દાનવો વા ત્વં યક્ષો ગન્ધર્વ એવ વા ।
અસ્માકં બાન્ધવો જાતો યોઽસિ સોઽસિ નમોઽસ્તુ તે ॥ ૮॥

નમોઽસ્તુ કૃષ્ણ કૃષ્ણેતિ નમો ગોપાલબન્ધવે ।
નમો બાલાય ગોપ્ત્રે ચ ગોપવેષાય બાન્ધવ ॥ ૯॥

નમસ્તે શિશુસિંહાય નમો ભૂધરધારિણે ।
દેવાયાથ વરિષ્ઠાય યક્ષાય ચ નમો નમઃ ॥ ૧૦॥

નમસ્તે નન્દપુત્રાય યશોદાયાઃ સુતાય ચ ।
કો ભવાન્ કશ્ચ વા દેવઃ કિમર્થં નોઽભિરક્ષસિ ॥ ૧૧॥

કેનચિદ્યદિ કાર્યેણ વસસીહ યદૃચ્છયા ।
વયં તવાનુગાઃ સર્વે ભવન્તં શરણં ગતાઃ ॥ ૧૨॥

ઇતિ હરિવંશાન્તર્ગતં ગોપૈઃ કૃતં શ્રીકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

હરિવંશ । અધ્યાય ૬૩.૧-૯॥

harivaMsha . adhyAya 63.1-9..

Proofread by PSA Easwaran

*Gopaih Kritam Shri Kritam Shrikrishna Stotram*
pdf was typeset on September 30, 2024

Please send corrections to *sanskrit@cheerful.com*